स्वादग्रङ्ग्यत्वं वा। आद्ये प्राचीनभेदयोरन्तःपातः। द्वितीये त्वकाव्यत्वम्। यदि चानास्वाद्यत्वं तदा क्षुद्रत्वमेव। क्षुद्रतायामनास्वाद्यत्वात्। तदुक्तं ध्वनिकृता "प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थितेः। उभे काव्ये ततोऽन्यद्यत्तच्चित्रमभिधीयते इति" इत्तिः।

तच्च काव्यं प्रकारान्तरेण द्विविधं महाकाव्यखण्डकाव्यभेदात्। तल्लक्षणादिकं सा० द० ६परि० उक्तं यथा "सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः। सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः। एकवंशभवा भूपाः कुलजा बहवोऽपि वा। शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते। अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः। इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्। चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्। आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा। क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम्। एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः। नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह। नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते। सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्। सन्ध्यासूर्य्येन्दुरजनीप्रदोषध्वान्तवासराः। प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः। सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः। रणप्रयाणोपयममन्त्रपुत्रोदयादयः। वर्ण्णनीया यथायोगं साङ्गोपाङ्गा अमी इह। कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा। नामास्य सर्गोपादेयकथया सर्गनाम तु। अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसञ्ज्ञकाः। प्राकृतैर्निर्म्मिते तस्मिन् सर्गा आश्वाससञ्ज्ञकाः। छन्दसा स्कन्दकेनैतत् क्वचिद्गलितकैरपि। अपभ्रंशनिबन्धेऽस्मिन् सर्गाः कडवकाभिधाः। तथापभ्रंशयोग्यानि छन्दांसि विविधान्यपि।

भाषाविभाषानियमात् काव्यं सर्गसमुज्झितम्। एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्ज्जितम्। खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च"।

तच्च काव्यं प्रकारान्तरेण द्विविधं "दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्। दृश्यं तत्राभिनेयं तत् रूपारोपात्तु रूपकम्" इति सा०द० उक्तेः

**काव्यचन्द्रिका** स्त्री काव्ये काव्यलक्षणादिप्रकाशने चन्द्रिकेव। अलङ्कारग्रन्थभेदे

**काव्यप्रकाश** पु० काव्यस्य स्वरूपादिप्रकाशो यत्र। काव्यस्वरूपादिज्ञापके मम्मटभट्टप्रणीते अलङ्कारग्रन्थभेदे।

**काव्यप्रदीप** पु० काव्यस्वरूपादिप्रकाशने प्रदीप इव। गोविन्दठक्कुरनिर्म्मिते भङ्ग्या काव्यप्रकाशार्थप्रकाशके अलङ्कारग्रन्थभेदे [ प्रस्तावके चन्द्रदेवी चौरभेदे त्रिका०

**काव्यचौर** पु० काव्यस्य चौर इव। परकीयकाव्यस्य स्वकीयत्वेन

**काव्यरसिक** त्रि० काव्यस्य रसं वेत्ति ठक्। काव्यप्रतिपाद्यरसाभिज्ञे

**काव्यलिङ्ग** न० अर्थालङ्कारभेदे अलङ्कारशब्दे३९८पृ०विवृतिः

**काव्यशास्त्र** न० काव्यं शास्त्रमिव उपदेशकत्वात्। काव्यरूपे शास्त्रे "कान्तासम्मिततयोपदेशयुजे" इति काव्यप्रकाशे तस्य उपदेशयोगित्वोक्तेः हितशासकशास्त्रतुल्यत्वम्। "काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्"

**काव्या** स्त्री कव—वर्णने करणे बा० ण्यत्। बुद्धौ तया हि नानाविधवर्णनात् तथात्वम्। २पूतनायां च मेदि०।

**काव्यार्थापत्ति** स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ३९८पृ० विवृतिः।

**काश** दीप्तौ भ्वा०आत्म०अक०सेट्। काशते अकाशिष्ट,काशाम्बभूव काशामास काशाञ्चक्रे चकाशे। णिच् अचकाशत्—त। ऋदित्त्वात् चङि नोपधाह्रस्वः। "काली कपालाभरणा चकाशे" "तया दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकाशे" कुमा० "नंनम्यमानाः फलदित्सयेव चकाशिरे तत्र लता विलोलाः" भट्टिः। काशी काशकः काशितः काशमानः काशः काशनं काशितुम् काशित्वा प्रकाश्य। यङ् लुक् चाकाशीति। वेदे ह्रस्वः चाकशीति

अनु+अनुरूपदीप्तौ अनुकाशते

अभि+ सर्व्वतः प्रकाशे अभिकाशते "अन्योऽनमञ्चमभिचाकशीति" शत०ब्रा० १४,७,१,१२, आभिमुख्येन दर्शने सक०। "घृतस्य धारा अभिचाकशीमि" ऋ०४,५८,५,९, "व्यञ्जमानाभिचाकशीमि"६,"आभिचाकशीमि अभि पश्यामि" भा०

अव+अवकाशे स्ववासयोग्यताप्राप्तौ "उभयतो मांसैः संछन्नं नावकाशते" शत०८,७,४,२०, यदसुत्राग्रेऽधिश्रयति पत्नीं ह्यवकाशयिष्यन् भवति" "अथ यत्पत्नीं नावकाशयेत्" शत०१,२,१,२०, अवकाशः "कृत्वावकाशे रुचिसंप्रकृप्तम्" भट्टिः अवेक्षणे सक०। "ज्ञातप्रियानूचानानवकाशयेत्" का० श्रौ० ६,७,१६, "अवकाशयेत् अवेक्षयेत्" कर्कः।

आ+समन्तात्स्थितौ आकाशः। अभिज्ञापने सक०। "संप्रत्युरः पुरुषमाकाश्य" शत०ब्रा० ७,४,१,४३, "आकाश्य अभिज्ञाप्य" भा०।